# Aksharadhamadhipatilakshanavarnanam

# અક્ષરધામાધિપતિલક્ષણવર્ણનમ્

## Document Information

Text title : Aksharadhamadhipatilakshanavarnanam

File name : akSharadhAmAdhipatilakShaNavarNanam.itx

Category : vishhnu, svAminArAyaNa, krishna, gurudev, deities_misc

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# અક્ષરધામાધિપતિલક્ષણવર્ણનમ્

પૂર્વં ત્વસાધારણલક્ષણં યચ્છ્રીસ્વામિનારાયણદિવ્યમૂર્તેઃ ।
પૂર્વાવતારાન્ સકલાન્ સ્વમૂર્તૌ સન્દર્શયેદુક્તમિદં હિ લક્ષ્મ ॥ ૧॥

વૈકુણ્ઠલોકાદિષુ દિવ્યમૂર્તૌ દિવ્યેઽદ્ભુતૈશ્વર્યસુખે ચ તાસુ ।
સ્વકીયરૂપે શતશો મનુષ્યાન્ સન્દર્શયેચ્ચિહ્નમિદં દ્વિતીયમ્ ॥ ૨॥

સાધારણાનપિ તં સમાધિં યઃ કારયિત્વા મનસઃ પ્રવૃત્તિમ્ ।
સંરોધયેત્ સ્વાત્મનિ તત્તૃતીયં લક્ષ્મોદિતં બ્રહ્મપુરાધિપસ્ય ॥ ૩॥

અન્યાવતારૈઃ શ્રિતમાનવાનાં શ્રેયસ્કૃતં વૃત્તિનિરોધનં વા ।
સન્દર્શયેત્તદ્દ્વયમેવ ભક્તદ્વારા હિ તુર્યં પ્રભુલક્ષણં તત્ ॥ ૪॥

ધાક્ષરે સ્વે બહુપ્રકાશે મુક્તવ્રજૈઃ સ્નેહભરેણ સેવ્યામ્ ।
સિંહાસનસ્થાં રુચિરાં સ્વમૂર્તિં સન્દર્શયેદ્ યાદૃશતાદૃશાન્નૄન્ ॥ ૫॥

તત્પઞ્ચમં લક્ષણમત્ર ધાર્મેઃ
અથોચ્યતે ચિહ્નમિદં હિ ષષ્ઠમ્ ।
પૂર્વાગમે જ્ઞાનવિરાગભક્તિધર્માદિકં યોગપથશ્ચ સાઙ્ખ્યમ્ ।
કુર્યાદ્ધિ તદ્વર્ણનમાત્મયોગાત્ સ્વૈઃ કારયેત્તત્ર ચમત્કૃતિશ્ચ ।
પૂર્વાગમાર્થાદપિ સૌષ્ઠવાર્થઃ પ્રાદુર્ભવેચ્છાન્તિકરઃ સુધેવ ॥ ૬॥

સ્વાલોકમાત્રેણ સહસ્રજીવવૃત્તેસ્તુ નૈસર્ગિકરોધનં સ્યાત્ ।
સ્વસ્મિન્ યથા ચુમ્બકમેતિ લોહં તત્ સપ્તમં ચિહ્નમ્ ॥ ૭॥

અથાષ્ટમં ચ ।
કસ્યાપિ નુઃ સ્વાશ્રયમાત્રતોઽપિ મહાશિવં સ્યાદ્ધિ તદન્તકાલે ।
તમક્ષરં નેતુમિયાત્ સ્વકીયૈર્મુક્તૈર્વિમાનૈઃ સહિતઃ સ ધાર્મિઃ ॥ ૮॥

નિજે નિદેશે શતશો મનુષ્યાન્ જ્ઞાને તથા ત્યાગયુતે સ્વધર્મે ।
સંસ્થાપયેદ્ ઘોરકલૌ યુગેઽસ્મિન્ પ્રોક્તં પ્રભોસ્તન્નવમં હિ લક્ષ્મ ॥ ૯॥

જનાઃ સ્વસમ્બન્ધગવસ્ત્રપુષ્પસ્પર્શેક્ષણાભ્યાં સમિયુઃ સમાધિમ્ ।
પશ્યેયુરૈશ્યં હરિમત્ર ધામ વિનાપિ યોગં દશમં ચ લક્ષ્મ ॥ ૧૦॥

દેશાન્તરે કશ્ચન ધાર્મિમૂર્તેર્વાર્તા પ્રકુર્યાત્ પુરતો નૃણાન્તમ્ ।
શ્રુત્વા જનાસ્તેજસિ લોકયેયુરેકાદશં ચિહ્નમિદં હરેશ્ચ ॥ ૧૧॥

પ્રધાનજીવેશ્વરકાલમાયામુક્તાક્ષરાણાં પુરુષોત્તમસ્ય ।
પૃથક્ પૃથગ્ લક્ષણમેવ કુર્યાત્ સ્વયં સ્વભક્તૈરપિ કારયેદ્વા ॥ ૧૨॥

સૈશ્વર્યરૂપાણિ પુનશ્ચ તેષાં પ્રદર્શયેદ્વા બહુશો જનાંશ્ચ ।
સર્વોત્તમસ્વાક્ષરધામભાજશ્ચિહ્નં પરં દ્વાદશમુક્તમેતત્ ॥ ૧૩॥

સન્દર્શયેત્ પૂર્વનિજાવતારાઁલ્લીનાન્ સ્વમૂર્તી શતશો મનુષ્યાન્ ।
નો ન તેષુ સ્વયમદ્ભુતં તત્ ત્રયોદશં ધર્મસુતસ્ય લક્ષ્મ ॥ ૧૪॥

ઇતિ શ્રીઅક્ષરધામાધિપતિલક્ષણવર્ણનં સમ્પૂર્ણમ્ ।

*Aksharadhamadhipatilakshanavarnanam*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*